# श्री कनकदुर्गाऽऽनंदलहरी



## వేదం-నాదం

Estd,2012 NC

Sri Kanchi Kamakoti Seva Foundation

# श्री कनकदुर्गाऽऽनंदलहरी

वंदे गुरुपदद्वंद्वमवाङ्मानसगोचरं
रक्तशुक्लप्रभामिश्रमतर्क्यं त्रैपुरं महः ।
अखंडमंडलाकारं विश्वं व्याप्य व्यवस्थितं
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥

शिवे सेवासक्ता श्रितभरणकार्यैकचतुरे
शिरोभिर्वेदानां चिरविनुतकल्याणचरिते ।
स्मितज्योत्स्नालीलारुचिररुचिमच्चंद्रवदने
जगन्मातर्मातर्जय कनकदुर्गे भगवति ॥ 1

नगाधीशट्कन्ये नलिनदलसंकाशनयने
सुगीतैर्गंधर्वैस्सुरयुवतिभिश्चानुचरिते ।
अगण्यैराम्नायैरपि गुणनिकायैर्विलसिते
जगन्मातर्मातर्जय कनकदुर्गे भगवति ॥ 2

निजश्रेयस्कामैर्निटलघटितां च तत्करपुटे
स्तुवद्भिस्सानंदं श्रुतिमधुरवाचां विरचनैः ।
असंख्यैर्ब्रह्माद्यैरमरसमुदायैः परिवृते
दया कर्तव्या ते मयि कनकदुर्गे भगवति ॥ 3

भवत्पादन्यासोचित कनकपीठीपरिसरे
पतंतस्साष्टांगं मुदितहृदया ब्रह्मऋषयः ।
न वांछंति स्वर्गं न च कमलसंभूत भवनं
न वा मुक्तेर्मार्गं ननु कनकदुर्गे भगवति ॥ 4

शचीस्वाहादेवी प्रमुख हरिदीशानरमणी
मणीहस्तन्यस्तैर्मणि खचितपात्रैरनुदिनम् ।
ससंगीतं नीराजित चरणपंकेरुहयुगे
कृपापूरं मह्यंदिश कनकदुर्गे भगवति ॥ 5

प्रवर्षत्यश्रांतं बहुगुणमभीष्टार्थनिचयं
स्वरूपध्यातॄणां चिकुर निकुरुंबं तव शिवे ।
अपामेकं वर्षं वितरति कदाचिज्जलधरो
द्वयोस्साम्यं किं स्यान्ननु कनकदुर्गे भगवति ॥ 6

कृशांगं स्वारातिं तुहिनकरमामृत्य तरसा
स्थितं मन्ये धन्ये तिमिरनिकरं ते कचभरम् ।
सहायं कृत्वायं हरमनसि मोहांधतमसं
वितेचे कामः श्रीमति कनकदुर्गे भगवति ॥ 7

तमो नाम्ना सम्यग्गलितपुनरुद्वांतरुचिर-
प्रभाशेषं भानोरिव तरुणिमानं धृतवतः ।
त्वदीये सीमंते कृतपदमिदं कुंकुमरजो-
वसेदश्रांतं मे हृदि कनकदुर्गे भगवति ॥ 8

त्रिलोकी वैचित्रीजनकघनसौंदर्यसदनं
विराजत्कस्तूरीतिलकमपि कंठे विजयते ।
यदालोकव्रीडाकुपित इव जूटे पशुपते-
र्विलीनो बालेंदुर्ननु कनकदुर्गे भगवति ॥ 9

पराभूतश्चेशालिकनयनकीलाविलसना-
द्विसृज्य प्राचीनं भुवनविनुतं कार्मुकयुगम् ।
हरं जेतुं त्वद् भ्रूच्छलमपरबाणासनयुगं
स्मरो धत्ते सर्वेश्वरि कनकदुर्गे भगवति ॥ 10

त्वदीयभ्रूवल्लीच्छलमदनकोदंडयुगली
समीपे विभ्राजत्तव सुविपुलं नेत्रयुगलम् ।
विजेतुं स्वारातिं विकचनवनीलोत्पलशर-
द्वयं तेनानीतं खलु कनकदुर्गे भगवति ॥ 11

दरिद्रं श्रीमंतं जरठमबलानां प्रियतमं
जडं संख्यानंतं समरचलितं शौर्यकलितम् ।
मनुष्यं कुर्वंतोऽमरपरिवृढं नित्यसदयाः
कटाक्षास्ते कार्या मयि कनकदुर्गे भगवति ॥ 12

पुरारातेर्बाणाः कुसुमशरतूणीरगलिता
नतानां संत्राणे निरवधिसुधावीचि निचयाः ।
वियद्गंगाभंगा बहुदुरितजालावृतिमतां
कटाक्षास्ते कार्या मयि कनकदुर्गे भगवति ॥ 13

दरिद्राणां कल्पद्रुम सुममरंदोदकझरा
अविद्याध्वांतानामरुणकिरणानां विहृतयः ।
पुरा पुण्यश्रेणी सुललितलताचैत्र समयाः
कटाक्षास्ते कार्या मयि कनकदुर्गे भगवति ॥ 14

गजंतो वाहंतः कनकमणिनिर्माणविलसा-
रथंतश्छत्रंतो बलयुत भटंतः प्रतिदिनम् ।
स्वभक्तानां गेहांगणभुवि चरंतो निरुपमाः
कटाक्षास्ते कार्या मयि कनकदुर्गे भगवति ॥ 15

पुरारातेरंगं पुलकनिकुरुंबैः परिवृतं
मुनिव्रातैर्ध्यातं मुकुलयुत कल्पद्रुमविभम् ।
श्रयंतश्चानंदं विचलदलिपोता इव चिरं
कटाक्षास्ते कार्या मयि कनकदुर्गे भगवति ॥ 16

हरिब्रह्मेंद्राद्यैः श्रुतिविदितगीर्वाणनिचयै-
र्वसिष्ठ व्यासाद्यै रपिच परमब्रह्मऋषिभिः ।
समस्तैराशास्यास्सकलशुभदाय द्विहृतयः
कटाक्षास्ते कार्या मयि कनकदुर्गे भगवति ॥ 17

विरिंचिर्यद्योगा द्विरचयति लोकान् प्रतिदिनं
विधत्ते लक्ष्मीशो विविधजगतां रक्षणविधिम् ।
ललाटाक्षो दक्षोऽभवदखिलसंहारकरणे
कटाक्षास्ते कार्या मयि कनकदुर्गे भगवति ॥ 18

उरोभागे शंभोर्विकच नवनीलोत्पलदल-
स्रजं संगृह्णंतो मृगमदरसं फालफलके ।
शिरोऽग्रे गंगायां रविदुहितृसंदेह जनकाः
कटाक्षास्ते कार्या मयि कनकदुर्गे भगवति ॥ 19

मदीय श्रीलीलाहरण पटुपाटच्चरमिति
क्वता हंता गंतुं श्रुतिविमल नीलोत्पलमिव ।
तदभ्यर्णं यातास्सहज निजवैशित्यकलिताः
कटाक्षास्ते कार्या मयि कनकदुर्गे भगवति ॥ 20

कलंकी मासांते वहति कृशतां नित्यजड इ-
त्यमुं चंद्रं हित्वा तव वदनचंद्राश्रितमिदम् ।
स्थितं जीवं जीवद्वितयमिति मन्ये नयनयो-
र्युगं कामारातेस्सति कनकदुर्गे भगवति ॥ 21

प्रसादो मय्यास्ते मयि च सहजं सौरभमिदं
तुला मे मैतस्येत्यविरत विवादाभिरतयोः ।
निवृत्ता नेदानीमपि च रिपुता ग्लौनलविनयो-
स्त्वदास्यं दृष्ट्वा श्रीमति कनकदुर्गे भगवति ॥ 22

मनोजातादर्श प्रतिम निजलीलौ तवशिवे
कपोलौ भूयास्तां मम सकलकल्याणजनकौ ।
श्रितश्रीताटंकद्वितयरुचयो यत्र मिलिता-
स्सुधारुक्सूर्याभा इव कनकदुर्गे भगवति ॥ 23

त्रयीस्तुत्ये नित्ये तववदन पंकेरुहभव-
त्सुगंधायातश्री प्रचलदलिनीवारणधिया ।
लसन्नासाकारे वहसि सहसा चंपकतुलां
नतत्सौंदर्यार्थं ननु कनकदुर्गे भगवति ॥ 24

वहन्मेकारुण्यं वरकमलरागाह्वयमणि-
स्सुधापूरं सारं सुरुचिरमृदुत्वं यदिवहेत् ।
तदालब्धुं योग्यो भवति भवदीयाधरतुलां
जगद्रक्षादीक्षावति कनकदुर्गे भगवति ॥ 25

लसन्नासाभूषाग्रगपृथुल मुक्तामणियुतं
नितांतारुण्यंत त्तवदशनवासो विजयते ।
सुधासिंधोर्मध्ये निपतित सुधाबिंदुसहित-
प्रवालश्रीचोरं ननु कनकदुर्गे भगवति ॥ 26

अयोग्या इत्यार्ये तवदशनसाम्याय कविभि-
र्विमुक्ता मुक्ता इत्यधिकविदिता मौक्तिकगणाः ।
दशामल्पांगत्वा तदनुमुखतांबूलसहिता-
गतास्तत्साहित्यं खलु कनकदुर्गे भगवति ॥ 27

जितोऽहं पार्वत्या मृदुलतरवाणी विलसनैः
कथं दृप्यस्यंबाधरसमतया बिंब कथय ।
इति क्रोधाच्चंच्वादलितवदने रक्तिमयुतः
शुकोऽयं विज्ञानी खलु कनकदुर्गे भगवति ॥ 28

फलं बिंबस्येदं भवति भवदीयाधरतुला
कृतालं तन्माद्यं वहति मतिरस्येति विदिता ।
नचेत्तस्मिन् भुक्ते सुमति कवितानामपि सृणां
कथं स्यात्तन्माद्यं भुवि कनकदुर्गे भगवति ॥ 29

अतुल्यं ते कंठं हरतरुणि दृष्ट्वा सुकवयः
प्रभाषंते शंखं परिहसनपात्रं भवति तत् ।
स्वरूपध्यातृणां सुभवति निधिश्शंख इतिचे-
दसंदेहं स्थाने खलु कनकदुर्गे भगवति ॥ 30

अकंठं ते कंठस्थितकनकसूत्रं विजयते
हरो यत्सामर्थ्यादमृतमिव पीत्वापि गरलम् ।
समाख्यां विख्यातां समलभत मृत्युंजय इति
त्रयीवेद्यक्रीडावति कनकदुर्गे भगवति ॥ 31

vedamnadam

चिरं ध्यात्वाध्यात्वा सकलविबुधाभीष्टनिचयं
ततस्त्वल्लावण्यामृतजलधि संप्राप्तजनने ।
भुजाकारेणैके भुवनविनुते कल्पकलते
श्रियैमेभूयास्तां ननु कनकदुर्गे भगवति ॥ 32

विराजत्केयूर द्वयमणिविभा भानुकिरणैः
नितांतव्याकोचीकृतमदनजिन्नेत्रकमलौ ।
विभोः कंठाश्लेषाद्विपुलपुलकांकूरजनकौ
भुजौ मे त्रातारौ ननु कनकदुर्गे भगवति ॥ 33

सुपर्वारामांतःस्फुरितसहकारद्रुमलता
समग्रश्रीजाग्रत्किसलय सगर्वोद्यमहरौ ।
करौ ते भूयास्तां मम शुभकरौ कांतिनिकरा
करौ निश्शंकं शांकरि कनकदुर्गे भगवति ॥ 34

प्रशस्तौ त्रैलोक्ये बहुलदनुजत्रासविचल-
स्मरुन्मस्तन्यस्तौ जननि तव हस्तौ हृदि भजे ।
स्मरो यत्संकाशा इति किसलयानेव धृतवान्
त्रिलोकी जेताऽऽसीत्खलु कनकदुर्गे भगवति ॥ 35

पुरारातेः पाणिग्रहणसमये मौक्तिकचयान्
विधातुं तच्छीर्षे जनकवचनादुन्नमितयोः ।
ययोरूपं दृष्ट्वाऽभव दुदितलज्जा सुरनदी
कदार्तित्रातारौ मम कनकदुर्गे भगवति ॥ 36

स्फुरंतो निश्शंकं पुरहर निरातंकविजय-
क्रियायात्रोद्युक्त स्मरबिरुदपाठा इव भृशम् ।
झणत्कारारावाः कनकवलयानां तवशिवे
वितन्वंतु श्रेयो मम कनकदुर्गे भगवति ॥ 37

कुचौ ते रूपश्री विजितलकुचौ मे शुभकरौ
भवेतां व्याकीर्णौ प्रकटतरमुक्तामणिरुचौ ।
विरिंचाद्या देवा यदुदितसुधापातुरनिशं
सुनम्रास्सेनान्यो ननु कनकदुर्गे भगवति ॥ 38

अतुल्यं तेमध्यं वदति हरिमध्येन सदृशं
जगत्तन्नो युक्तं जननि खलु तद्रूपकलने ।
कृताशः पंचास्यो भवति तव वाहः प्रतिदिनं
जगत्सर्गक्रीडावति कनकदुर्गे भगवति ॥ 39

असौ पुन्नागस्य प्रसवमृदुशाखाश्चलगतं
तपःकृत्वा लेभे जननि तव नाभेः सदृशताम् ।
प्रमत्तः पुन्नाग प्रसव इतरस्तावकगते-
स्तुलामाप्तुं वांछत्यपि कनकदुर्गे भगवति ॥ 40

त्रिलोकीवासांचद्युवतिजनता दुर्गमभव-
न्नितंबश्रीचौर्यं कृतवदिति संचित्य पुलिनम् ।
सरो बाह्यंचक्रे जननि भवदीयस्मरणतो
झरेवाधीरेशा जननि कनकदुर्गे भगवति ॥ 41

जितोऽहं पार्वत्या मृदुतरगतीनां विलसनैः
तदूर्वोस्सौंदर्यं सहजमधिगंतुं जडतया ।
कृतारंभारंभा इति विदलिताऽऽसां वनमयं
करी सामर्षः श्रीकरि कनकदुर्गे भगवति ॥ 42

प्रविष्टा ते नाभीबिलमसित रोमावलिरियं
कटी चंचत्कांचीगुणविहित सौत्रामणमणेः ।
रुचां रेखेवास्ते रुचिरतर मूर्ध्वायनगता
श्रितश्रेणीसंपत्करि कनकदुर्गे भगवति ॥ 43

vedamnadam

अनिर्वाच्यं जंघारुचि ररुचिसौंदर्यविभवं
कथं प्राप्तुं योग्यस्तव कलमगर्भो गिरिसुते ।
तदीयं सौभाग्यं कणिशजननैकावधि सुधी-
जनैश्चिंताकार्या ननु कनकदुर्गे भगवति ॥ 44

सदा मे भूयात्ते प्रपदममिताभीष्टसुखदं
सुरस्त्री वाहाग्रच्युत मृगमदानां समुदयम् ।
अशेषं निर्धौतः प्रणयकलहे यत्र पुरजि-
ज्जटा गंगानीरैर्ननु कनकदुर्गे भगवति ॥ 45

मनोज्ञाकारं ते मधुरनिनदं नूपुरयुगं
ग्रहीतुं विख्यातान् गतिविलसनाना मतिरयान् ।
स्थितंमन्ये हंसद्वयमिति न चेद्धंसकपदं
कथं धत्ते नाम्ना ननु कनकदुर्गे भगवति ॥ 46

त्वदीयं पादाब्जद्वयमचलकन्ये विजयते
सुरस्त्रीकस्तूरीतिलक निकरात्यंतसुरभि ।
भ्रमंतो यत्रार्याप्रकरहृदयेंदिंदिरगणा-
स्सदा माद्यंति श्रीमति कनकदुर्गे भगवति ॥ 47

अपर्णे ते पादा वतनुतनुलावण्य सरसी
समुद्भूते पद्मे इति सुकविभिर्निश्चितमिदम् ।
न चेद्गीर्वाणस्त्रीसमुदयललाटभ्रमरकाः
कथं तत्रासक्ता ननु कनकदुर्गे भगवति ॥ 48

रमावाणींद्राणीमुखयुवतिसीमंतपदवी
नवीनार्कच्छायासदृशरुचि यत्कुंकुमरजः ।
स्वकांगाकारेण स्थितमिति भवत्पादकमल-
द्वयेमन्ये शंभोस्सति कनकदुर्गे भगवति ॥ 49

दवाग्निं नीहारं गरलममृतं वार्धिमवनी-
स्थलं मृत्युंमित्रं रिपुमपि च सेवाकरजनम् ।
विशंकं कुर्वंतो जननि तव पादांबुरुहयोः
प्रणामास्संस्तुत्या मम कनकदुर्गे भगवति ॥ 50

जलप्रायाविद्या हृदिसकलकामाः करगताः
महालक्ष्मीर्दासी मनुजपतिवर्यास्सहचराः ।
भवत्यश्रांतं ते पदकमलयोर्भक्तिसहितां
नतिंकुर्वाणानां ननु कनकदुर्गे भगवति ॥ 51

vedam nadam

तव श्रीमत्पाद द्वितयगत मंजीरविलस-
न्मणिच्छायाच्छन्नाकृतिभवति यत्फालफलकम् ।
सतत्रैवाशेषावनिवहनदीक्षा समुचितं
वहेत्पट्टं हैमं ननु कनकदुर्गे भगवति ॥ 52

तनोतु क्षेमं त्वच्चरणनख चंद्रावलिरियं
भवत्प्राणेशस्य प्रणयकलहारंभसमये ।
यदीयज्योत्स्नाभिर्भवति नितरां पूरिततनु-
शिरोऽग्रे बालेंदुर्ननु कनकदुर्गे भगवति ॥ 53

नृणांदीनानां त्वच्चरणकमलैकाश्रयवतां
महालक्ष्मीप्राप्तिर्भवति न हि चित्रास्पदमिदम् ।
समाश्रित्यांभोजं जडमपि च रेखाकृतिधरं
श्रियो नित्यं धामाजनि कनकदुर्गे भगवति ॥ 54

खगोत्तंसा हंसा स्तवगति विलासेन विजिता-
स्सलज्जा स्तत्तुल्यं गमनमधिगंतुं सकुतुकाः ।
भजंते स्रष्टारं रथवहन एवैकनिरता
मनोजातारातेस्सति कनकदुर्गे भगवति ॥ 55

जगन्मातर्भव्यांगुलि विवरमार्गेषु गलितं
चतुर्धा ते पादांबुज सलिलमेतद्विजयते ।
प्रदातुं धर्मार्थ प्रमुख पुरुषार्थद्वययुगं
चतुर्मूर्त्या विद्धाविव कनकदुर्गे भगवति ॥ 56

अजोऽयं श्रीशोऽयं सुरपरिवृढोऽयं रविरयम् ।
शशांकोऽयं कोऽयं सकलजलधीनां पतिरयं
इति त्वां संद्रष्टुं समुपगतदेवाः परिचरै-
र्जनैर्विज्ञाप्यंते खलु कनकदुर्गे भगवति ॥ 57

महापीठासीनां मघवमुखबर्हिर्मुखसखी
निकायैस्संसेव्यां करतलचलच्चामरयुतैः ।
प्रदोषे पश्यंतीं पशुपतिमहातांडवकलां
भजे त्वां श्रीकांतासखि कनकदुर्गे भगवति ॥ 58

परंज्योतिस्तज्ज्ञास्सुरतरुलतां दुर्गतजना
महाज्वालामग्नेर्भुवनभयदा राक्षसगणाः ।
ललाटाक्षस्साक्षा दतनुजयलक्ष्मी मविरतं
हृदि ध्यायंति त्वां ननु कनकदुर्गे भगवति ॥ 59

समुद्यद्बालार्कायुतशत समानद्युतिमतीं
शरद्राकाचंद्र प्रतिमदरहासांचितमुखीम् ।
सखीं कामारातेश्चकितहरिणीशाबनयनां
सदाहं सेवे त्वां हृदि कनकदुर्गे भगवति ॥ 60

तपःकृत्वा लेभे त्रिपुरमथनस्त्वां प्रियसखीं
तपस्यंती प्राप्ता त्वमपि गिरिशं प्राणदयितम् ।
तदेवं दांपत्यं जयति युवयोर्भीतधनयोः
कविस्तुत्यं नित्यं ननु कनकदुर्गे भगवति ॥ 61

विभोर्जानासि त्वं विपुलमहिमानं पशुपते-
स्सएव ज्ञाताते चरितजलराशेरनवधेः ।
न हि ज्ञातुंदक्षो भवति भवतो स्तत्वमितर-
स्त्रीलोकी संधानेष्वपि कनकदुर्गे भगवति ॥ 62

नविष्णुर्नब्रह्मा नच सुरपतिर्नापि सविता
नचंद्रो नोवायुर्विलसति हि कल्पांतसमये ।
तदा नाट्यंकुर्वं स्तवरमण एको विजयते
त्वयासाकं लोकेश्वरि कनकदुर्गे भगवति ॥ 63

vedam nadam

धनुश्चक्रे मेरुं गुणमुरगराजं शितशरं
रमाधीशंचापि त्रिपुरमथनेन त्रिनयनः ।
तदेतत्सामर्थ्यं सहजनिजशक्ते स्तवशिवे
जगद्रक्षा दीक्षावति कनकदुर्गे भगवति ॥ 64

त्रिकोणांतर्बिंदूपरि विलसनात्यंत रसिकां
त्रिभिर्वेदैः स्तुत्यां त्रिगुणमयमूर्तित्रय युताम् ।
त्रिलोकै राराध्यां त्रिनयनमनः प्रेमजननीं
त्रिकालं सेवे त्वां हृदि कनकदुर्गे भगवति ॥ 65

मनोध्यातुं नालं जननि तव मूर्तिं निरुपमां
वचोवक्तुं शक्यं नभवति हि ते चित्रचरितम् ।
तनु स्त्वत्सेवायां भवति विवशा दीनसमये
कथंवाहं रक्ष्यस्तव कनकदुर्गे भगवति ॥ 66

वियोगं ते नूनं क्षणमसहमानः पशुपति-
र्ददौ ते देहार्धं तरुण सुमबाणायुतसमम् ।
अनेन ज्ञातव्यस्तव जननि सौंदर्यमहिमा
त्रिलोकीस्तोतव्यः खलु कनकदुर्गे भगवति ॥ 67

कृता योगा येन श्रुतिषु विदिताः पूर्वजनने
धनं दत्तं येन द्विजकुलवरेभ्यो बहुविधम् ।
तपस्तप्तं येनास्खलितमतिना तस्यघटिते
भवद्भक्तिश्शंभोस्सति कनकदुर्गे भगवति ॥ 68

समस्ताशाधीश प्रवरवनिताहस्तकमलैः
सुमैः कल्पद्रूणां निरतकृतपूजौ निरुपमौ ।
नतानामिष्टार्थ प्रकरघटनापाटवयुतौ
नमस्यामः पादौ तव कनकदुर्गे भगवति ॥ 69

पुरा बाल्ये शीताचलपरिसरक्षोणिचरणे
ययोस्स्पर्शं लब्ध्वा मुदितमनसः कीटनिचयान् ।
विलोक्य श्लाघंते विबुधसमुदायाः प्रतिदिनं
नमामस्तौपादौ ननु कनकदुर्गे भगवति ॥ 70

नराणामज्ञानां प्रशमयितु मंतःस्थितिमिरा-
ण्यलक्ष्मीसंतापं गमितमनुजान् शीतलयितुम् ।
समर्था न्निर्दोषां श्चरणनखचंद्रा नभिनवान्
नमामस्सद्भक्त्या तव कनकदुर्गे भगवति ॥ 71

मुकुंद ब्रह्मेंद्र प्रमुख बहुबर्हिर्मुखशिखा-
विभूषाविभ्राजन्मघवमणि संदर्भरुचिभिः ।
विशंकं साकं त्वच्चरणनखचंद्रेषुघटितं
कवींद्रैः स्तोतव्यं तव कनकदुर्गे भगवति ॥ 72

नखानां धावल्यं निजमरुणिमानंच सहजं
नमद्गीर्वाणस्त्रीतिलकमृगनाभिश्रियमपि ।
वहंतौ सत्त्वादि त्रिगुणरुचिसारानिव सदा
नमस्यामः पादौ तव कनकदुर्गे भगवति ॥ 73

मणिश्रेणीभास्वत्कनकमय मंजीरयुगली-
झणत्कारारावच्छलमधुरवाचां विलसनैः ।
अभीष्टार्थान् दातुं विनतजनताह्वानचतुरा-
विव ख्यातौ पादौ तव कनकदुर्गे भगवति ॥ 74

नमद्गीर्वाणस्त्री तिलकमृगनाभीद्रवयुतं
नखच्छायायुक्तं जननि तव पादांबु जयति ।
समंचत्कालिंदीझरसलिल संम्मिश्रितविय-
न्नदीवारीव श्रीकरि कनकदुर्गे भगवति ॥ 75

सुरश्रेणीपाणिद्वितयगतमाणिक्यकलशै-
र्धृतं हेमांभोजप्रकरमकरंदेन मिलितम् ।
सतां बृंदैर्वंद्यं चरणयुग संक्षालनजलं
पुनात्वस्मान्नित्यं तव कनकदुर्गे भगवति ॥ 76

विरावन्मंजीरद्वयनिहितहीरोपलरुचि-
प्रसादे निर्भेदं प्रथित परमब्रह्मऋषिभिः ।
शिरोभागैर्धार्यं पदकमलनिर्णेजनजलं
वसन्मे शीर्षाग्रे तव कनकदुर्गे भगवति ॥ 77

समीपे माणिक्यस्थगितपदपीठस्य नमतां
शिरस्सु त्वत्पादस्नपनसलिलं यन्नि वतति ।
तदेवोच्चस्थानस्थितिकृदभिषेकांबु भवति
प्रभावोऽयं वर्ण्यस्तव कनकदुर्गे भगवति ॥ 78

भवन्मूर्तिध्यानप्रवण ममलंचापि हृदयं
भवन्नामश्रेणीपठननिपुणां चापि रसनाम् ।
भवत्सेवादार्ढ्य प्रथितमपि कायं वितर मे
भवानंदश्रेयस्करि कनकदुर्गे भगवति ॥ 79

प्रभाषंते वेदाश्चकितचकितं तावकगुणान्
न पारस्य द्रष्टा तव महिमवार्धेर्विधिरपि ।
भवत्तत्वं ज्ञातुं प्रकृतिचपलानामपि नृणां
कथं वा शक्तिस्स्यान्ननु कनकदुर्गे भगवति ॥ 80

नृपा एकच्छत्रं सकलधरणीपालनपराः
सुधामाधुर्यश्रीललितकविताकल्पनचणाः ।
निरातंकं शास्त्राध्ययनमनसां नित्यकविता
त्वदीया ज्ञेया श्रीमति कनकदुर्गे भगवति ॥ 81

कदंबानां नागाधिकचतुरसंचारिभसरी
कदंबानां मध्ये खचरतरुणीकोटिकलिते ।
स्थितां वीणाहस्तां त्रिपुरमथनानंदजननीं
सदाहं सेवे त्वां हृदि कनकदुर्गे भगवति ॥ 82

गिरां देवी भूत्वा विहरसि चतुर्वक्त्रवदने
महालक्ष्मीरूपा मधुमथनवक्षस्थलगता ।
शिवाकारेणत्वं शिवतनुनिवासं कृतवती
कथं ज्ञेया माया तव कनकदुर्गे भगवति ॥ 83

vedamnadam

महाराज्यप्राप्तावतिशयित कौतूहलवतां
सुधामाधुर्योद्यत्सरसकविता कौतुकयुजाम् ।
कृताशानां शश्वत्सुखजनक गीर्वाणभजने
त्वमेवै का सेव्या ननु कनकदुर्गे भगवति ॥ 84

फणी मुक्ताहारो भवति भसितं चंदनरजो
गिरींद्रः प्रासादो गरलममृतं चर्म सुपटः ।
शिवे शंभोर्यद्यद्विकृतचरितं तत्तदखिलं
शुभंजातं योगात्तव कनकदुर्गे भगवति ॥ 85

दरिद्रेवाक्षुद्रे गिरिवरसुते यत्र मनुजे
सुधापूराधारस्तव शुभकटाक्षो निपतति ।
बहिर्द्वारप्रांतद्विरदमदगंधस्स भवति
प्रियेकामारातेर्ननु कनकदुर्गे भगवति ॥ 86

प्रभाषंते वेदाः प्रकटयति पौराणिकवचः
प्रशस्तं कुर्वंति प्रथितबहुशास्त्राण्यविरतम् ।
स्तुवंतः प्रत्यग्रं सुकविनिचयाः काव्यरचनै-
रनंतां ते कीर्तिं ननु कनकदुर्गे भगवति ॥ 87

असूयेर्ष्यादंभाद्यवगुणपरित्याग चतुरा-
स्सदाचारासक्ता स्सदयहृदया स्सत्यवचनाः ।
जितस्वांताश्शांता विमलचरिता दाननिरताः
कृपापात्रीभूतास्तव कनकदुर्गे भगवति ॥ 88

यदीयांभस्नानाद्दुरितचरितानां समुदया
महापुण्यायंते महिमवति तस्याश्शुभकरे ।
तटे कृष्णानद्या विहितमहितानंदवसते
कृपा कर्तव्या ते मयि कनकदुर्गे भगवति ॥ 89

यथा पुष्पश्रेणीविलसितकदंबद्रुमवने
तनोर्भागे नागेश्वरवलयिनः श्रीमति यथा ।
तथा भक्तौघानां हृदि कृतविहारे गिरिसुते
दया कर्तव्या ते मयि कनकदुर्गे भगवति ॥ 90

समारुह्याभंगं मृगपतितुरंगं जनयुतं
गलाग्रे धूम्राक्षप्रमुख बलबर्हिर्मुखरिपून् ।
निहत्य प्रत्यक्षं जगदवनलीलां कृतवती
प्रसन्ना भूयास्त्वं मयि कनकदुर्गे भगवति ॥ 91

पराभूय त्र्यक्षं सवनकरणे यत्रसहितं
दुरात्मानं दक्षं पितरमपि संत्यज्य तरसा ।
गृहे नीहाराद्रेर्निजजनसमंगीकृतवती
प्रसन्ना भूयास्त्वं मयि कनकदुर्गे भगवति ॥ 92

तपः कृत्वा यस्मिन् सुरपतिसुतोऽनन्यसुलभं
भवादस्त्रं लेभे प्रबलरिपुसंहारकरणम् ।
किरातेऽस्मिन् प्रीत्या सहविहरणे कौतुकवती
प्रसन्ना भूयास्त्वं मयि कनकदुर्गे भगवति ॥ 93

vedamnadam

शरच्चंद्रालोकप्रतिमरुचि मंदस्मितयुते
सुरश्रीसंगीत श्रवणकुतुकालंकृतमते ।
कृपापात्रीभूत प्रणमदमराभ्यर्चितपदे
प्रसन्ना भूयास्त्वं मयि कनकदुर्गे भगवति ॥ 94

कपालस्रग्धारी कठिनगजचर्मांबरधरः
स्मरद्वेषी शंभुर्बहुभुवनभिक्षाटनपरः ।
अविज्ञातोत्पत्तिर्जननि तव पाणिग्रहणतो
जगत्सेव्यो जातः खलु कनकदुर्गे भगवति ॥ 95

पदाभ्यां प्रत्यूष स्फुटविकचशोणाब्जविलसत्
प्रभाभ्यां भक्तानामभयवरदाभ्यां तव शिवे ।
चरद्भ्यां नीहाराचलपदशिलाभंगसरणौ
नमः कुर्मः कामेश्वरि कनकदुर्गे भगवति ॥ 96

मदीये हृत्पद्मे निवसतु पदांभोजयुगलं
जगद्वंद्यं रेखाध्वजकुलिशवज्रांकितमिदम् ।
स्फुरत्कांतिज्योत्स्ना विततमणिमंजीरमहितं
दयाऽऽधेयाऽमेया मयि कनकदुर्गे भगवति ॥ 97

सदाऽहं सेवे त्वत्पदकमलपीठी परिसरे
स्तुवन् भक्तिश्रद्धा परिचय पवित्रीकृतधिया ।
भवंतीं कल्याणीं प्रचुरतर कल्याणचरितां
दयाऽऽधेयाऽमेया मयि कनकदुर्गे भगवति ॥ 98

हरश्शूली चैकः पितृवननिवासी पशुपतिः
दिशावासो हालाहलकबलनव्यग्रधृतिमान् ।
गिरीशोऽभूदेवंविधगुणचरित्रोऽपि हि भवत्
सुसांगत्यात् श्लाघ्यो ननु कनकदुर्गे भगवति ॥ 99

समस्ताशाधीश प्रमुख सुरवर्यैः प्रणमिता
महर्नाथज्वालापतिहरण पालीत्रिनयनाम् ।
सदा ध्यायेऽहं त्वां सकलविबुधाभीष्टकलने-
रतां तां कल्याणीं हृदि कनकदुर्गे भगवति ॥ 100

सुसंतोषं योवा जपति नियमादूहितशत-
ज्वलद्वृत्तैश्श्राव्यां निशि कनकदुर्गास्तुतिमिमाम् ।
महालक्ष्मीपात्रं भवति सदनं तस्य वदनं
गिरां देवीपात्रं कुलमपि विधेः कल्पशतकम् ॥ 101

स्तुतिं दुर्गादेव्यास्सततमघसंहारकरणे
सुशक्तांवा लोके पठति सुधिया बुद्धिकुशलः ।
श्रियं देवी तस्मै वितरति सुतानांच जगतां
पतित्वं वाग्मित्वं बहु कनकदुर्गे भगवति ॥ 102

शतश्लोकीबद्धं ननु कनकदुर्गांकितपदं
गुरूपन्यस्तं तद्भुवि कनकदुर्गास्तवमिदम् ।
निबद्धं माणिक्यैः कनकशतमानं भवति ते
यथा हृद्यं देविस्फुट पदविभक्तं विजयताम् ॥ 103

॥ इति श्रीमत्परमहंस परिव्राजकाचार्यवर्य
श्रीशंकराचार्य विरचितं
श्रीमत्कनकदुर्गाऽऽनंदलहरीस्तोत्रं संपूर्णम् ॥